# Vasudevakritam Shiva Stotram

# વાસુદેવકૃતં શિવસ્તોત્રમ્

## Document Information

Text title : Vasudevakritam Shiva Stotram

File name : vAsudevakRRitaMshivastotram.itx

Category : shiva, mahAbhArata, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | anuparva | adhyAya 146/1-29||

Latest update : November 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

January 18, 2026

*sanskritdocuments.org*

Vasudevakritam Shiva Stotram

# વાસુદેવકૃતં શિવસ્તોત્રમ્

વાસુદેવ ઉવાચ ।
યુધિષ્ઠિર મહાબાહો મહાભાગ્યં મહાત્મનઃ ।
રુદ્રાય બહુરૂપાય બહુનામ્ને નિબોધ મે ॥ ૧॥

વદન્ત્યગ્નિં મહાદેવં તથા સ્થાણું મહેશ્વરમ્ ।
એકાક્ષં ત્ર્યમ્બકં ચૈવ વિશ્વરૂપં શિવં તથા ॥ ૨॥

દ્વે તનૂ તસ્ય દેવસ્ય વેદજ્ઞા બ્રાહ્મણા વિદુઃ ।
ઘોરામન્યાં શિવામન્યાં તે તનૂ બહુધા પુનઃ ॥ ૩॥

ઉગ્રા ઘોરા તનુર્યાઽસ્ય સોઽગ્નિર્વિદ્યુત્સ ભાસ્કરઃ ।
શિવા સૌમ્યા ચ યા તસ્ય ધર્મસ્ત્વાપોઽથ ચન્દ્રમાઃ ॥ ૪॥

આત્મનોઽર્ધં તુ તસ્યાગ્નિરુચ્યતે ભરતર્ષભ ।
બ્રહ્મચર્યં ચરત્યેષ શિવા યાસ્ય તનુસ્તથા ॥ ૫॥

યાસ્ય ઘોરતમા મૂર્તિર્જગત્સંહરતે તયા ।
ઈશ્વરત્વાન્મહત્ત્વાચ્ચ મહેશ્વર ઇતિ સ્મૃતઃ ॥ ૬॥

યન્નિર્દહતિ યત્તીક્ષ્ણો યદુગ્રો યત્પ્રતાપવાન્ ।
માંસશોણિતમજ્જાદો યત્તતો રુદ્ર ઉચ્યતે ॥ ૭॥

દેવાનાં સુમહાન્યચ્ચ યચ્ચાસ્ય વિષયો મહાન્ ।
યચ્ચ વિશ્વં મહત્પાતિ મહાદેવસ્તતઃ સ્મૃતઃ ॥ ૮॥

સમેધયતિ યન્નિત્યં સર્વાર્થાન્સર્વકર્મભિઃ ।
શિવમિચ્છન્મનુષ્યાણાં તસ્માદેષ શિવઃ સ્મૃતઃ ॥ ૯॥

દહત્યૂર્ધ્વં સ્થિતો યચ્ચ પ્રાણોત્પત્તિઃ સ્થિતિશ્ચ યત્ ।
સ્થિરલિઙ્ગશ્ચ યન્નિત્યં તસ્માત્સ્થાણુરિતિ સ્મૃતઃ ॥ ૧૦॥

યદસ્ય બહુધા રૂપં ભૂતં ભવ્યં ભવત્તથા ।

સ્થાવરં જઙ્ગમં ચૈવ બહુરૂપસ્તતઃ સ્મૃતઃ ॥ ૧૧॥

ધૂમ્રં રૂપં ચ યત્તસ્ય ધૂર્જટીત્યત ઉચ્યતે ।
વિશ્વે દેવાશ્ચ યત્તસ્મિન્વિશ્વરૂપસ્તતઃ સ્મૃતઃ ॥ ૧૨॥

સહસ્રાક્ષોઽયુતાક્ષો વા સર્વતોઽક્ષિમયોઽપિ વા ।
ચક્ષુષઃ પ્રભવસ્તેજો નાસ્ત્યન્તોઽથાસ્ય ચક્ષુષામ્ ॥ ૧૩॥

સર્વથા યત્પશૂન્પાતિ તૈશ્ચ યદ્રમતે પુનઃ ।
તેષામધિપતિર્યચ્ચ તસ્માત્પશુપતિઃ સ્મૃતઃ ॥ ૧૪॥

નિત્યેન બ્રહ્મચર્યેણ લિઙ્ગમસ્ય યદા સ્થિતમ્ ।
મહયન્ત્યસ્ય લોકાશ્ચ મહેશ્વર ઇતિ સ્મૃતઃ ॥ ૧૫॥

વિગ્રહં પૂજયેદ્યો વૈ લિઙ્ગં વાપિ મહાત્મનઃ ।
લિઙ્ગં પૂજયિતા નિત્યં મહતીં શ્રિયમશ્નુતે ॥ ૧૬॥

ઋષયશ્ચાપિ દેવાશ્ચ ગન્ધર્વાપ્સરસસ્તથા ।
લિઙ્ગમેવાર્ચયન્તિ સ્મ યત્તદૂર્ધ્વં સમાસ્થિતમ્ ॥ ૧૭॥

પૂજ્યમાને તતસ્તસ્મિન્મોદતે સ મહેશ્વરઃ ।
સુખં દદાતિ પ્રીતાત્મા ભક્તાનાં ભક્તવત્સલઃ ॥ ૧૮॥

એષ એવ શ્મશાનેષુ દેવો વસતિ નિત્યશઃ ।
યજન્તે તં જનાસ્તત્ર વીરસ્થાનનિષેવિણમ્ ॥ ૧૯॥

ઇતિ મહાભારતે અનુશાસનપર્વણિ ૧૪૬ અધ્યાયાન્તર્ગતં
વાસુદેવકૃતં શિવસ્તોત્રં સમ્પૂર્ણમ્ ।

મહાભારત । અનુપર્વ । અધ્યાય ૧૪૬/૧-૨૯॥

mahAbhArata . anuparva . adhyAya 146/1-29..

Proofread by PSA Easwaran

*Vasudevakritam Shiva Stotram*

pdf was typeset on January 18, 2026

Please send corrections to *sanskrit@cheerful.com*